अभेद्यं कवचं चेदं स्पर्शरूपवदुत्तमम्। नागराजमिवासिं च गाण्डीवे समयोजयत्” इति भा० व०१६१अ०। २किरीटयुक्तमात्रे त्रि०। “किरीटिनं गदिनं चक्रहस्तम्” गीता स्त्रियां ङीप्

**किरीडाट** धौर्त्ये आकृतिगणत्वात् कण्ड्वा० यक् प० सेट् अक०। किरोडाय्यति अकिरीडाटीत्।

**किर्म्मि** स्त्री कॄ—कि नि०मुट्। १पलाले (पोयाल) २गृहे ३स्वर्णपुत्तलिकायाञ्च मेदि०। वा ङीप् किर्म्मीत्यपि तत्रार्थे

**किर्म्मिर** त्रि० किर्म्मीर+पृषो० वेदे ह्रस्वः। चित्रवर्णयुक्ते। “नक्षत्रेभ्यः किर्म्मिरं चन्द्रमसे किलासम्” यजु० ३०, २१। पुरुषमेधे

**किर्म्मीर** पु० कॄ—गम्भीरा० ईरन् नि०। नागरङ्गे (नारेङ्गी) १जम्बीरभेदे। २राक्षसभेदे। ३चित्रवर्णे च मेदि० ४तद्वति त्रि०।

**किर्म्मीरजित्** पु० किर्म्मीरं राक्षसभेदं जितवान् जि—भूते क्विप्। भीमसेने तद्वधकथा भा०व०११अ० यथा

“प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम्। अहं बकस्य भ्राता वै किर्म्मीर इति विश्रुतः” इत्युपक्रम्य “ततो भीमो महाबाहुरारुह्य तरसा द्रुमम्। दशव्याममथोद्विद्धं निष्पत्रमकरोत्तदा। चकार सज्यं गाण्डीवं वज्रनिष्पेषगौरवम्। निमेषान्तरमात्रेण तथैव विजयोऽर्ज्जुनः। निवार्य्य भीमो जिष्णुं तं तद्रक्षो मेघनिस्वनम्। अभिद्रुत्याब्रवीद्वाक्यं तिष्ठ तिष्ठेति भारत!। इत्युक्त्वैनमभिक्रुद्धः कक्षामुत्पीड्य पाण्डवः। निष्पिष्य पाणिना पाणिं संदष्टौष्ठपुटो बली। तमभ्यधावद्वेगेन भीमो वृक्षायुधस्तदा। यमदण्डप्रतीकाशं ततस्तं तस्य मूर्द्धनि। पातयामास वेगेन कुलिशं मघवानिव। असंभ्रान्तन्तु तद्रक्षः समरे प्रत्यदृश्यत। चिक्षेप चोल्मुकं दीप्तमशनिं ज्वलितामिव। तदुदस्तमलातन्तु भीमः प्रहरतां वरः। पदा सव्येन चिक्षेप तद्रक्षः पुनराव्रजत्। किर्म्मीरश्चापि सहसा वृक्षमुत्पाट्य पाण्डवम्। दण्डपाणिरिव क्रुद्धः समरे प्रत्यधावत”। इत्युपक्रम्य तयोर्युद्धमुपवर्ण्य “अथैनमाक्षिप्य बलाद्गृह्य मध्ये वृकोदरः। धूनयामास वेगेन वायुचण्ड इव द्रुमम्। स भीमेन पराक्रुष्टो दुर्बलो बलिना रणे। व्यस्तम्भत यथाप्राणं विचकर्ष च पाण्डवम्। तत एनं परिश्रान्तमुपलभ्य वृकोदरः। योक्त्रयामास बाहुभ्यां पशुं रशनया यथा। विनदन्तं महानादं भिन्नभेरीस्वनं बली। भ्रामयामास सुचिरं विष्फुरन्तमचेतनम्। तं विषीदन्तमाज्ञाय राक्षसं पाण्डुनन्दनः। प्रगृह्य तरसा दोर्भ्यां पशुमारममारयत्। आक्रम्य च कटीदेशे जानुना राक्षसाधमम्। पीड़यामास पाणिभ्यां तस्य कण्ठं वृकोदरः। अथ जर्ज्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम्। भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह। हिड़िम्बबकयोः पाप! न त्वमश्रुप्रमार्ज्जनम्। करिष्यसि गतश्चापि यमस्य सदनं प्रति। इत्येवमुक्त्वा पुरुषप्रवीरस्तं राक्षसं क्रोधपरीतचेताः। विस्रस्तवस्त्राभरणं स्फुरन्तमुद्भ्रान्तचित्तं व्यसुमुत्ससर्ज्ज”। किर्म्मीरहादयोऽप्यत्र। [ङ्गे जम्बीरभेदे त्रिका०

**किर्म्मीरत्वच्** पु० किर्म्मीरा चित्रा त्वगस्य। नागर-

**किल** शौक्ल्ये क्रीडायाञ्च तुदा०पर०अक०सेट्। किलति अकेलीत् चिकेल प्रनिकिलति [याम् बभूव आस चकार चक्रे केलिः

**किल** प्रेरणे चुरा०सक सेट्। केलयति ते अचीकिलत्” केल-

**किल** अव्य० किल—क। १वार्त्तायाम् २अनुशयार्थे, ३निश्चये, ४संभाव्ये ५प्रसिद्धार्थद्योतने ६हेतौ ७अरुचौ ८अलीके ९तिरस्कारे च। “दमयन्ती किलकिञ्चितं किल” नैष०। “अमूं किल त्वं त्रिदिवादवातरः,, माघः। “तद्गुणं तदवयती” किलात्मनोऽपि “तदपि न किल बाल पल्लवाग्रेति” माघः, “ध्रुवं किलाव्याजमनोहरं वपुः,, शकु०। १किलेत्यागमारुचिन्यक्करणसंभाव्यहेत्वलीकेषु” गणरत्ने उक्त्वा तत्तद्विषये उदाहृतं यथा आगमे, “कंसं जघान किल वासुदेवः” कृष्णकर्तृकं कंसहननमागमसिद्धमित्यर्थः। अरुचौ “एवं किल केचिद्वदन्ति” केषाञ्चिदेवं कथनं वक्तुररुचिविषय इत्यर्थः न्यक्कारे “स किल योत्स्यते” तस्य योधनशक्तिराहित्यद्योतनात् तिरस्कारोगम्यते सम्भावनायाम् “पार्थः किल विजेष्यते कुरून्” पार्थकर्त्तृककुरुविजयः सम्भवनाविषयइत्यर्थः। हेतौ “स किलैवमुक्तवान्” तत्कथनस्यान्यत्र हेतुता द्योत्यते। अलीके “प्रसह्य सिंहः किल तां चकर्ष” रघुः। सिंहकर्त्तृकं नन्दिनीकर्षणं वस्तुतोऽलीकं काल्पनिकत्वात्। अव्ययविशेषस्य अस्य शब्दान्तरसहकारेण प्रयोगविशेषो निरुक्तकारेण निरणायि यथा “किलेतिविद्याप्रकर्षे एवं किलेत्यथापि न ननु इत्येताभ्यां संप्रयुज्यतेऽनुपृष्टे न किलैवम्। ननु किलैवम्”। इति प्रश्नानन्तरं तस्यानभ्युपगमे न किलैवमिति, अभ्युपगमे तु ननु किलैवमिति प्रयोज्यमित्यर्थः तथाच तस्य एवंशब्दोत्तरता न—ननु इत्येतच्छब्दपूर्व्वकता च।